श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

शिवप्रोक्तम्

# ॥ श्री कमलास्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री कमलास्तोत्रम् ॥

ओङ्काररूपिणी देवि विशुद्धसत्त्वरूपिणी।
देवानां जननी त्वं हि प्रसन्ना भव सुन्दरि॥ **1** ॥

तन्मात्रञ्चैव भूतानि तव वक्षस्स्थलं स्मृतम्।
त्वमेव वेदगम्या तु प्रसन्ना भव सुन्दरि॥ **2** ॥

देवदानवगन्धर्वयक्षराक्षसकिन्नरैः।
स्तूयसे त्वं सदा लक्ष्मि प्रसन्ना भव सुन्दरि॥ **3** ॥

लोकातीता द्वैतातीता समस्तभूतवेष्टिता।
विद्वज्जनकीर्तिता च प्रसन्ना भव सुन्दरि॥ **4** ॥

परिपूर्णा सदा लक्ष्मि त्रात्री तु शरणार्थिषु।
विश्वाद्या विश्वकर्त्री च प्रसन्ना भव सुन्दरि॥ **5** ॥

ब्रह्मरूपा च सावित्री त्वद्दीप्त्या भासते जगत्।
विश्वरूपा वरेण्या च प्रसन्ना भव सुन्दरि॥ **6** ॥

क्षित्यप्तेजोमरुद्व्योमपञ्चभूतस्वरूपिणी।
बन्धादेः कारणं त्वं हि प्रसन्ना भव सुन्दरि॥ **7** ॥

महेशे हैमवती त्वं कमला केशवेऽपि च।
ब्रह्मणः प्रेयसी त्वं हि प्रसन्ना भव सुन्दरि॥ **8** ॥

चण्डी दुर्गा कालिका च कौशिकी सिद्धिरूपिणी।
योगिनी योगगम्या च प्रसन्ना भव सुन्दरि॥ **9** ॥

बाल्ये च बालिका त्वं हि यौवने युवतीति च।
स्थविरे वृद्धरूपा च प्रसन्ना भव सुन्दरि॥ **10** ॥

गुणमयी गुणातीता आद्या विद्या सनातनी।
महत्तत्त्वादिसंयुक्ता प्रसन्ना भव सुन्दरि॥ **11** ॥

तपस्विनी तपःसिद्धि स्वर्गसिद्धिस्तदर्थिषु।
चिन्मयी प्रकृतिस्त्वं तु प्रसन्ना भव सुन्दरि॥ **12** ॥

त्वमादिर्जगतां देवि त्वमेव स्थितिकारणम्।
त्वमन्ते निधनस्थानं स्वेच्छाचारा त्वमेवहि॥ **13** ॥

चराचराणां भूतानां बहिरन्तस्त्वमेव हि।
व्याप्यव्यापकरूपेण त्वं भासि भक्तवत्सले॥ **14** ॥

त्वन्मायया हृतज्ञाना नष्टात्मानो विचेतसः।
गतागतं प्रपद्यन्ते पापपुण्यवशात्सदा॥ **15** ॥

तावत्सत्यं जगद्भाति शुक्तिकारजतं यथा।
यावन्न ज्ञायते ज्ञानं चेतसा नान्वगामिनी॥ **16** ॥

त्वज्ज्ञानात्तु सदा युक्तः पुत्रदारगृहादिषु।
रमन्ते विषयान्सर्वानन्ते दुखप्रदान् ध्रुवम्॥ **17** ॥

त्वदाज्ञया तु देवेशि गगने सूर्यमण्डलम्।
चन्द्रश्च भ्रमते नित्यं प्रसन्ना भव सुन्दरि॥ **18** ॥

ब्रह्मेशविष्णुजननी ब्रह्माख्या ब्रह्मसंश्रया।
व्यक्ताऽव्यक्ता च देवेशि प्रसन्ना भव सुन्दरि॥ **19** ॥

अचला सर्वगा त्वं हि मायातीता महेश्वरि।
शिवात्मा शाश्वता नित्या प्रसन्ना भव सुन्दरि॥ **20** ॥

सर्वकायनियन्त्री च सर्वभूतेश्वरेश्वरी।
अनन्ता निष्काला त्वं हि प्रसन्ना भव सुन्दरि॥ **21** ॥

सर्वेश्वरी सर्ववन्द्या अचिन्त्या परमात्मिका।
भुक्तिमुक्तिप्रदा त्वं हि प्रसन्ना भव सुन्दरि॥ **22** ॥

ब्रह्माणी ब्रह्मलोके त्वं वैकुण्ठे सर्वमङ्गला।
इन्द्राणी अमरावत्यामम्बिका वरूणालये॥ **23** ॥

यमालये कालरूपा कुबेरभवने शुभा।
महानन्दाग्निकोणे च प्रसन्ना भव सुन्दरि॥ **24** ॥

नैर्ऋत्यां रक्तदन्ता त्वं वायव्यां मृगवाहिनी।
पाताले वैष्णवीरूपा प्रसन्ना भव सुन्दरि॥ **25** ॥

सुरसा त्वं मणिद्वीपे ऐशान्यां शूलधारिणी।
भद्रकाली च लङ्कायां प्रसन्ना भव सुन्दरि॥ **26** ॥

रामेश्वरी सेतुबन्धे सिंहले देवमोहिनी।
विमला त्वं च श्रीक्षेत्रे प्रसन्ना भव सुन्दरि॥ **27** ॥

कालिका त्वं कालिघाटे कामाख्या नीलपर्वते।
विरजा ओड्रदेशे त्वं प्रसन्ना भव सुन्दरि॥ **28** ॥

वाराणस्यामन्नपूर्णा अयोध्यायां महेश्वरी।
गयासुरी गयाधाम्नि प्रसन्ना भव सुन्दरि॥ **29** ॥

भद्रकाली कुरुक्षेत्रे त्वं च कात्यायनी व्रजे।
महामाया द्वारकायां प्रसन्ना भव सुन्दरि॥ **30** ॥

क्षुधा त्वं सर्वजीवानां वेला च सागरस्य हि।
महेश्वरी मथुरायां च प्रसन्ना भव सुन्दरि॥ **31** ॥

रामस्य जानकी त्वं च शिवस्य मनमोहिनी।
दक्षस्य दुहिता चैव प्रसन्ना भव सुन्दरि ॥ **32** ॥

विष्णुभक्तिप्रदां त्वं च कंसासुरविनाशिनी।
रावणनाशिनीं चैव प्रसन्ना भव सुन्दरि ॥ **33** ॥

लक्ष्मीस्तोत्रमिदं पुण्यं यः पठेद्भक्तिसम्युतः।
सर्वज्वरभयं नश्येत्सर्वव्याधिनिवारणम् ॥ **34** ॥

इदं स्तोत्रं महापुण्यमापदुद्धारकारणम्।
त्रिसन्ध्यमेकसन्ध्यं वा यः पठेत्सततं नरः ॥ **35** ॥

मुच्यते सर्वपापेभ्यो तथा तु सर्वसङ्कटात्।
मुच्यते नात्र सन्देहो भुवि स्वर्गे रसातले ॥ **36** ॥

समस्तं च तथा चैकं यः पठेद्भक्तितत्परः।
स सर्वदुष्करं तीर्त्वा लभते परमां गतिम् ॥ **37** ॥

सुखदं मोक्षदं स्तोत्रं यः पठेद्भक्तिसंयुतः।
स तु कोटितीर्थफलं प्राप्नोति नात्र संशयः ॥ **38** ॥

एका देवी तु कमला यस्मिन्तुष्टा भवेत्सदा।
तस्याऽसाध्यं तु देवेशि नास्तिकिञ्चिज्जगत्त्रये ॥ **39** ॥

पठनादपि स्तोत्रस्य किं न सिद्ध्यति भूतले।
तस्मात्स्तोत्रवरं प्रोक्तं सत्यं सत्यं हि पार्वति ॥ **40** ॥

॥ श्री कमलास्तोत्रं समाप्तम् ॥